7 चैतन्यं दृक्क्रियारूपं तदस्त्यात्मनि सर्वदा । (Mṛgendrāgama, Vp., 2:5ab)

8 अनादिमलसम्बन्धान्मलिनत्वमणोः स्थितम् ।
अनादिमलमुक्तत्वान्निर्मलत्वं शिवे स्थितम् । (Kiraṇāgama, Vp., 2:2)

9 पशुरात्मास्वतन्त्रश्च चिन्मात्रो मलदूषितः ।
सम्मूढो नित्यसंसारी किञ्चिज्ज्ञोऽनीश्वरोऽक्रियः । (Sarvajñānottara, Vp., 1:4)
अज्ञो जन्तुरनीशोऽयमात्मा यस्माद्द्विजर्षभाः ।
सोऽपि सापेक्षयैव स्यात् स्वप्रवृत्तौ घटादिवत् । (Pauṣkarāgama, Vp., 1:86)

and the inert material world (pāśa); while Śiva's power of knowledge and action (jñānakriyāsvabhāva) is unlimited and illimitable that of the individual self is limited. But the self has the same unlimited power of knowledge and action like Śiva[7] which is covered since beginningless time by an impurity called mala[8]; since it pertains to the self it is called āṇavamala. Thus obstructed the self considers himself to be of limited intellect and power, always dependent and wrongly identifying himself with the material psycho-physical body experiences pleasure and pain, births and deaths[9]. As an inevitable consequence the self, because of its ignorance gets bound by another bondage, māyā[10] and experiences pain and pleasure which are the fruits of its karma. Āgama-s declare that being a substance (dravya) this obstructing agent, āṇavamala, can be removed only by the power of grace of Śiva[11]. This is technically called dīkṣā which is the act of Śiva[12]. Once done, the innate power of supreme knowledge and action of the self is restored and it starts manifesting it in all its future activities. According to the Āgamas

---

[10] पशोरज़तया मायायोगो भोगाय कर्मणाम् । (Varuṇapaddhati, 7ab)

[11] दीक्षैव मोचयत्यूर्ध्वं शैवं धाम नयत्यपि (Svāyambhuvāgama as quoted in the comm. Vilocana on Varuṇapaddhati, 5ab.

[12] समयादीश्वरेच्छातो मुक्तिर्नास्त्यन्यथा यतः । (Varuṇapaddhati, 7cd)

[13] विषापहारं कुरुते ध्यानबीजबलैर्यथा ।
कुरुते पाशविश्लेषं तथाचार्यः शिवाध्वरैः । (Sarvajñānottara, Vp. 1:8)

[14] सपाशत्रयविश्लेषं शिवत्वं व्यज्यते यया ।
क्रिया सा कथ्यते दीक्षा (Varuṇapaddhati, 2)

[15] भक्तिवैराग्यलक्षणा ।। ibid.
तस्मात् ज्ञानं च भक्तिश्च वैराग्यमिति चात्मनः ।
दीक्षितस्येह चिह्नानि पशोस्त्वेतानि नाञ्जसा । ibid. 3

for some highly evolved and mature selves, technically called vijñānākala and pralayākala, Śiva directly performs the dīkṣā whereas it is the ācārya who, himself initiated before and practises regularly all the rites prescribed in the Āgamas, that performs the rite of dīkṣā for the ordinary men called sakala[13]. Though physically it is the ācārya that performs the rite spiritually it is Śiva, who, through the medium of the ācārya that executes the entire rite of dīkṣā. Varuṇaśiva puts all these ideas and epigrammatically expresses that "Dīkṣā is that act by which the innate śivahood is manifested along with the destruction of all the three types of bonadges".[14] It is succinctly said in the text that initiation is characterised by "devotion [to Śiva] and non-attachment [towards worldly enjoyment]"[15] Now it becomes clear that dīkṣā has such a paramount importance in the doctrinal and ritual scheme of Śaivasidhānta system. It is of different types and it is the duty of the ācārya who performs the rite to decide which type of dīkṣā his disciple deserves based and the disciples behaviour, mental attitude, etc[16]. and on the intensity of the fall of grace of Śiva which is called śaktipāta[17].

A brief analysis of the contents of the Varuṇapaddhati based on the valuable commentary of Nigamajñānadeśika.

Before commencing the discussion about dīkṣā Varuṇaśiva very

---

16 भक्तिश्च शिवभक्तेषु श्रद्धा तच्छासने विधौ ।
अनेनानुमितिः शिष्टहेतोः स्थूलधियामपि । Mṛgendrāgama, Vp., 5:5)

17 येषां शरीरिणां शक्तिः पतत्यविनिवृत्तये ।
तेषां तल्लिङ्गमौत्सुक्यं मुक्तौ द्वेषो भवस्थितौ । (Mṛgendrāgama, Vp., 5:4)

18 Varuṇapaddhati, 2-7.

19 चाक्षुषी स्पर्शदीक्षा च वाचिकी मानसी तथा ।
शास्त्री च योगदीक्षा च हौत्रीत्यादिरनेकथा । (Varuṇpaddhati, 15)

briefly states the nature of the bound self, the three impurities (mala) by which it is bound and the way out for the self to cut asunder the cord of bondage and regain its innate śivahood[18]. There are different types of dīkṣā[19]:

1. Cākṣuṣī- That which is done through the eyes: Here the ācārya looks at the disciple intently in order that his bondages are destroyed after meditating on the form of Śiva.
2. Sparśadīkṣā: The ācārya after placing, by nyāsa, the five brahmamantra and the aṅgamantra along with the mūlamantra on his right hand and touches the disciple from head to foot.
3. Vāgdīkṣā: The ācārya utters the saṃhitā mantra-s after intensely meditating on his oneness with Śiva.
4. Mānasī: The ācārya performs all the external rites with the kuṇḍa, maṇḍala, etc,internally.
5. Śāstradīkṣā: The ācārya teaches the Śaivāgama-s; this presupposes the samayadīkṣā which is the basic and the entrance, as it were, into the śaiva practices.
6. Yogadīkṣā: The ācārya instructs on the various limbs, such as the dhāraṇā of the śaiva yoga system[20]; this also presupposes the samayadīkṣā.

Another classification of the dīkṣā is twofold: jñānavatī where all the rites are done mentally and kriyāvatī which consists in the elaborate performance of the rites. The latter is again divided into nirbīja and sabīja. For the category of initiands such as samayī and putraka the nirbījā type is done while for the sādhaka

---

[20] For a better understanding of śaiva yoga system one may profitably refer to the Sarvajñānottāgama, Yogapāda critically edited along with the commentary of Aghorśiva with a detailed introduction and translation in Tamil by T. Ganesan and published by Sri Aghorasivacharya Trust, Chennai, 2006.

and the ācārya the sabījā type is done. The basic difference between these two is that when one is initiated in the former type he need not perform the obligatory daily rites which are done by the initiating ācārya himself during the dīkṣā whereas he who is initiated in the sabījā variety has to do all the obligatory rites regularly. Normally the former is done for women, children, dumb, mentally retarded and for others afflicted by diseases. By bīja the rites and conducts of the samaya initiate (samayācāra) is meant. This, again, is divided into śivadharmiṇī and lokadharmiṇī and sādhikārā and niradhikārā, etc.

The foremost of all the dīkṣā according to Varuṇaśiva is the Nirvāṇadīkṣā which mainly consists in the purification, for the disciple, of all the six adhvans: mantra, varṇa, pada, tattva, bhuvana and kalā. It mainly consists in invoking all the five kalā-s, nivṛtti, pratiṣṭhā, vidyā, śānti and śāntyatītā in the thread called pāśasūtra, then removing all these and thereby making the self free from all the three types of bondage and finally bestowing all the divine qualities of Śiva. The Varuṇapaddhati very clearly lists them in order and as said earlier the verses in this section are easy to memorise and an ācārya who performs the nirvāṇadīkṣā can, easily without mistake, keep in mind the ritual sequence and the significance of the rites with the help of this text. We find here clear formulations of the six adhvan-s, mantra, pada, etc. The mantra-s which are the five brahmamantra-s, six aṅgamantra-s and the mūlamantra are pervaded by the eighty-one pada-s of the vyomavyāpimantra which in their turn are pervaded by the fifty-one letters; these letters are pervaded by the thirty-six tattva-s which are pervaded by more than two hundred worlds (bhuvana) which in their turn are pervaded by the five kalā-s--nivṛtti, pratiṣṭhā, vidyā, śānti

and śāntyatītā.

- The Commentator and his Commentary

Nigamajñānadeśika whose commentary Vilocana is being published here frot he first time is one of the foremost śaivasiddhānta system builders of the 16th century[21]. Maraiñānacampantar (Nigamajñāna I), his disciple Maraiñānatēcikar (alias Nigamajñānadeśika = Nigamajñāna II) were residents of the holy town of Chidambaram. These two authors--uncle and nephew as well as teacher and disciple--have worked in collaboration: the disciple (also bearing the same name as his preceptor) comments on some of the works of his teacher.

At the end of his voluminous compendium, Dīkṣādarśa, we get some personal details of Nigamajñāna: He was a native of the ancient śaiva holy place Rudrakoṭi popularly known as Tirukkaḻukkunram; he had his educationn and initiation at Tillai (Chidambaram) under his uncle of the same name; he was honoured by the Nāyaka king Sadāśivarāya and with the king's encouragement he constructed front maṇḍapa in the temple at Tillai and other important temples; also he installed (established ?) the śaivāgama-s in some of the important holy places such

[21] For a detailed study of the philosophical views and of the highly significant contributions for the spread and sytematisatrion of Śaivasiddhśnta in the medieval period by Nigamajñānadeśika one may profitably refer to the article *Development of Medieval Śaivasiddhānta: Contribution of Nigamajnana I and his disciple Nigamajnana II* by T. Ganesan at the seminar *Forms and Uses of the Commentary in the Indian World* organised on the occasion of the Golden Jubilee of the French Institute of Pondicherry, February, 2005 and which is going to be published soon as part of collected papers.

as Tillai, Tiruvaṇṇāmalai, Tiruviṭaimarutūr, Vṛddhācalam, Tiruveṇkāṭu, and Tirukkuṭantai (Kumbakonam) and translated Śivadharmottara the greatest śaiva classic into Tamil.

They have written texts elucidating all the branches of śaivism. Nigamajñānadeśika comes in the tradition of great Śaivasiddānta preceptors who are authors of many works both in Sanskrit and Tamil; he himself has written in both the languages. Nigamajñānadeśika is one of the earliest commentators of the Civañāṉacittiyār of Aruḷnandiśivācārya. Three great compendiums--Ātmārthapūjāpaddhati, Dīkṣādarśa and Śivajñānasiddhisvapakṣadṛṣṭāntasaṃgraha--stand testimony to the skill and the vast amount of erudition these authors had in the Āgamic lore; Kamalālayapurāṇam and Aruṇagiripurāṇam--two great sthalapurāṇa texts that are Tamil adaptations of parts of the Skandapurāṇa and the Tamil translation of the Śivadharmottara--bespeak their deep knowledge in and devotion to the purāṇic lore which serve as the strong base for popular religion; philosophical texts in Tamil such as Caivacamayaneṟi, Paramōpatēcam, Patipacupācappaṉuval, Caṅkaṟpa-nirākaraṇam, the erudite and elaborate commentary on the important and fundamental classic of Śivajñānabodha tradition, namely, the Civañāṉacittiyār and Śivajñānabodhopanyāsa (in Sanskrit), to name a few, stand witness to their firm grasp, depth of knowledge and the argumentative skill both in the ritual base and the philosophical niceties of the Śaivasiddhānta system in general and the Śivajñānabodha tradition in particular.

The conributions of both these authors pertain to almost all branches of śaivism; for them, śaivasiddhānta encompasses, apart from the caryā, kriyā, etc. that are enjoined in the Āgama, the broader ones such as the sthalapurāṇa and various other

religious acts of service like dāna, serving the devotees of Śiva, etc. that serve as the foundation for popular śaivism attracting the common man. A system that was previously based mainly on the special kinds of revealed texts, the Āgama-s and concerned mainly with initiation of different kinds and the subsequent ritual practices Śaivism takes a wider dimension under such authors as Nigamajñāna. Texts that do not strictly belong to the āgamic group such as the Śivadharmottara, Skandapurāṇa and the sthalapurāṇa-s (Kamalālayapurāṇam, Aruṇagirippurāṇam) that eulogise a particular śaiva holy place and instill devotion in the minds of the pilgrims and lay devotees are translated into Tamil by Nigamajñāna to serve as the basis for a broader Śaivism appealing to the devotion of the common man.

- Commentary Vilocana

Before Nigamajñāna there is the unpublished commentary of Bhaṭṭa Śivottama[22] which he refers in the introduction. As the text of Varuṇapaddhati explains only the salient and the most important aspects concerning dīkṣā the commentator adds more explanations at many places; we also come across many supportive arguments and passages from many Āgama texts such as the Pauṣkara, Kiraṇa, Raurava, Acintyaviśvasādākhya, Mṛgendra and other ancient Śaivasiddhānta philosophical texts such as the Tattvasaṃgraha, Tattvaprakāśa, etc. For discussions on the rite of dīkṣā Nigamajñāna cites many passages from the Siddhāntaśekhara which, again, is a very important and popular

---

[22] The existing copy at the French Institute, Pondicherry of this text is from its original preserved at the Government Oriental Manuscripts Library, Chennai; the text is corrupt at many places and not clear.

medieval manual on the entire ritual (nitya, naimittika and kāmya) of the Śaivasiddhānta tradition. The Varuṇapaddhati does not start at once with the rite of dīkṣā; as a preliminary it gives the outline of the most important philosophical doctrines of the śaiavsiddhānta system: the three ultimate realities (tripadārtha)- pati, paśu and pāśa. Then explaining briefly each one of them and the basic rôle played by dīkṣā in securing liberation it commences with the types and other details of the dīkṣā. Nigamajñāna elaborates the discussion on the doctrinal concepts with more arguments and textual references to authorities such as the Kiraṇa, Sarvajñāottara and others like Tattvaprakāśa, Tattvasaṃgraha, etc. In the same way Nigamajñāna explains well various types of dīkṣā such as vācakī, mānasī, hautrī, etc. At many places he expresses his concurrence with Aghoraśiva and cites approvingly a few passages from his commenatries. Nigamajñāna enters into quite a long discussion about the necessity of the kalātattva which manifests, in a limited way, the innate knowership and agency of the self (jñatvakartṛtva). On the whole the commentary is very usfuḷ in explaining very important points and bringing out the importance of dīkṣā in śaivasiddhānta ritual scheme. I am sure that the important text of the Dīkṣāprakaraṇam of Varuṇapaddhati with its valuable commentary by Nigamajñānadeśika will certainly help the scholars in understanding the basics and depth of the concept of dīkṣā in system of śaivasiddhānta. I am also happy to inform that I am working on the second chapter, Pratiṣṭhāprakaraṇam and I hope that by Śiva's grace it will see the light soon.

I sincerely thank the Director, French Institute, Pondicherry for having allowed me to consult the manuscripts of this text for bringing out this edition. I also express my thanks to Sri. Kartikeya

Sivam who appreciates the value and importance of the vast śaiva literature, has been instrumental in bringing out some important śaiva texts and who encouraged me to undertake the edition of this text. I also thank my friends and well wishers who are the source of strength and goodwill that enabled me to undertake this service and who are partake the śivapuṇya that accrues due to the publication of this text.

वरुणपद्धतिः

वरुणशिवविरचिता

निगमज्ञानदेशिकविरचितविलोचनाख्यव्याख्यासहिता

निर्वाणद्वयबीजाय नमः सोमाय शम्भवे ।
अथ संगृह्यते बीजद्वयं दीक्षाप्रतिष्ठयोः ॥ १ ॥

सदागण्डतटस्यन्दिदानवारिणिलोलुपैः ।
भ्रमरैराकुलं वन्दे श्रीकल्पकविनायकम् ।
व्याघ्रपादपतञ्जल्योर्नयनानन्ददायिनः ।
नृत्यतो नटराजस्य पादाम्भोजमुपाश्रये ।
स्वकापाङ्गविलासेन मोदयन्ती नटेश्वरम् ।
शिवकामप्रियादेवी शिवं दिशतु शाश्वतम् ।
नमस्कृत्य गुरुं वाचां देवीं प्रोन्मील्यते मया[१] ।
श्रीमद्वरुणपद्धत्या विलोचनमिदं सताम् ।
शिवोत्तमेन गुरुणा लेशाद्व्याख्यानमीरितम् ।
अहं तदनुगुण्येन वक्ष्ये संक्षिप्य युक्तितः ।

अथाचार्यो वरुणाभिधानोऽनेकशिवागमरहस्यपरिज्ञानविमलितचेताः[२] सकलजनानुजिघृक्षया दीक्षाप्रतिष्ठाबीजं सारभूतं वक्तुकामः स्वेष्टदेवताप्रणामपूर्वकं[३] शिष्टाचारनिर्वाहाय प्रारिप्सितं प्रतिजानीते— निर्वाणद्वयबीजाय मलादिबन्धननिर्गमनरूपनिश्रेयसयुगलकारणभूताय । निसपूर्वात् वा[४] गतिगन्धनयोरिति[५] धातोर्भावे ल्युट्[*] । मुक्तिः कैवल्य–

---

[१] मया] C3, C4; सदा C1

[२] °विमलितचेताः] C1, C4; °विमलीताः] C3

[३] °कामः स्वेष्टदेवताप्रणाम] C 1; °कामस्त्विष्टदेवप्रणाम°] C 3, C4

[४] निस पूर्वाद्वा] C1, C4; नित्यं पूर्वाद्वा] C3

[५] पाणिनीयधातुपाठः, १०५०

[*] (लिट् इति सर्वासु मातृकासु)

निर्वाणश्रेयोनिश्रेयसामृत मिति[६] । हेतुर्नाकारणं[७] बीजमिति चामरः[८]। कीदृशस्य कारणमित्यत[९] आह– सोमाय उमासहिताय । अत्र[१०] उमाशब्देनानुग्रहोन्मुखीशक्तिर्विवक्षिता । तत्सहितस्यैव निश्रेयसकारणत्वात्। सा च[११] शक्तिर्निरधिकरणसाधिकरणभेदेन[१२] द्विविधा[१३] सती निर्वाणद्वयस्य हेतुर्भवति[१४] । एवं चानुग्रहद्वैविध्यादेव[१५] निर्वाणद्वैविध्यमित्युक्तं भवति । अत एव शम्भुः शं सुखं मोक्षरूपमस्माद्भवतीति शम्भुः । तस्मै शिवाय नमः । अनेन तस्यैव नमस्कार्यत्वं नान्यस्य[१६] संसारोत्तारकत्वाभावादिति सूचितम् । तदुक्तं–

विहाय साम्बमीशानं यजन्ते ये विमुक्तये ।
ते महातमसाक्रान्ता न तेषां परमा गतिः ।
विहाय साम्बमीशानं यजन्ते देवतान्तरम् ।
ते महाघोरसंसारे पतन्ति परिमोहिता इति ।

अथ इष्टदेवतानमस्कारानन्तरमनेन ग्रन्थारम्भे इष्टदेवता–प्रणामरूपमङ्गलस्यावश्यकत्वं सूचितं भवति । अन्यथा अथशब्दस्य श्लोकादावेव प्रयोगः स्यात् । दीक्षाप्रतिष्ठयोः दीक्षाशब्देन वक्ष्यमाणचक्षुषादयः प्रतिष्ठाशब्देन वक्ष्यमाणस्थापनादयः । उभयोरपि यद्बीजद्वयं निर्वाणनिदानं प्रतिष्ठानिदानं चेत्यर्थः । अथवा उभयत्र प्रवृत्तिप्रयोजकं वा तत् संगृह्यते । आगमेषु बहुविस्तारत्वात्

---

[६] अमरकोश, १:५:६
[७] हेतुर्नाकारणं] C1, C4; हेतुकाकारणं] C3
[८] अमरकोश, १:४:२८
[९] कारणमित्यत] C1; कारणत्वमित्यत C2, C4
[१०] अत्र पदं C 1, C4 मातृकयोः न विद्यते ।
[११] च Cति पदं C 1 मातृकायां नास्ति ।
[१२] निरधिकरणसाधिकरणभेदेन] C 1, C2, C4; निरधिकरणभेदेन C3
[१३] द्विविधा] C2, C3, C4; द्विधा C1
[१४] निर्वाणद्वयस्य हेतुर्भवति] C2, C3, C4; निर्वाणद्वयहेतुर्भवति C1
[१५] ॰द्वैविध्यादेव] C2, C3, C4; द्वैविध्यादेवं C1
[१६] अन्यस्य इत्यधिकं C2, C3, C4 मातृकासु वर्तते ।

सुखप्रतिपत्त्यर्थं संक्षिप्यतेऽस्माभिरिति वाक्यशेषः। अनेन प्रस्तारेण समूलत्वादनुपेक्षित्वमुक्तम् । अत्र निर्वाणद्वयबीजायेत्यत्र केचिदेवमाहुः– विज्ञानकैवल्ये सति प्रकृत्यधिकारलक्षणं पराणिमादिसिद्ध्यपरपर्यायमेकं निर्वाणं तेषामतिक्रान्तकर्ममायात्वेन मलमात्रस्य सद्भावात्। अपरं तु अधिकारबन्धमोक्षपूर्वकं साक्षाच्छिवत्वाभिव्यक्तिरिति। अन्ये तु दीक्षैव तावदेकनिर्वाणम् । यथा उपनीतस्य माणवकस्य यथापूर्वमवस्थितशरीरस्यापि शास्त्रबलादुपनयनाख्यसंस्कारेण द्वितीयजन्माङ्गीक्रियते एवमिहापि दीक्षया निर्वाणजीवन्मुक्तिः । अन्यत्तु तस्य शरीरपातानन्तरं शिवत्वाभिव्यक्तिरिति । अपरे तु योनिद्वैविध्यक्रमात् निर्वाणद्वैविध्यं द्विधा खलु पुंसां योनिः जनन्यात्मिका विश्वोपादानात्मिका च । श्रूयते–

योनिं योनिमधितिष्ठत्येक इति । तस्मादपश्चिमजन्माख्यमेकनिर्वाणं ततः परं तस्य जन्माभावात् । विश्वोपादानयोनिरपि शिवत्वाभिव्यक्तिरिति परम्पराभावाद्[१७] द्विधा निर्वाणमिति । एतत्पक्षत्रयेऽपि भुक्त्यनपायान्निर्वाणत्वमेव नास्ति स पाशः । भुक्तिमुक्त्योः सहानवस्थानलक्षणविरोधस्य दुष्परिहारत्वात्। अथोद्देशक्रमानुरोधेन दीक्षां वक्तुं प्रथमं दीक्षालक्षणं तत्कारणं चाह–

सपाशत्रयविश्लेषं शिवत्वं व्यज्यते यया ।
क्रिया सा कथ्यते दीक्षा भक्तिवैराग्यलक्षणा ॥ २ ॥

यया क्रियया सपाशत्रयविश्लेषं मलमायाकर्मरूपपाशत्रयबन्धनिवृत्तिसहितं[१८] शिवत्वं विद्यमानमेवात्मनो मलतिरोहितं शिवत्वं शिववत् सार्वज्ञ्यसर्वकर्तृत्वादिरूपं व्यज्यते व्यक्तीक्रियते । सा पुनः कीदृशी ? भक्तिवैराग्यलक्षणा । शिवे भक्तिः सा चाष्टविधा नवविधा वा । तदुक्तं शिवधर्मे (१:२७–२९)–

ईश्वरः–

मद्भक्तजनवात्सल्यं पूजायां चानुमोदनम् ।

---

[१७] परम्पराभावात्] C1; परापरभवात् C2, C3, C4

[१८] मलमायाकर्मरूपपाशत्रयबन्धनिवृत्तिसहितं] C1; वक्ष्यमाणमलमाया° C2, C3, C4

स्वयमभ्यर्चनं चैव ममार्थे चाङ्गचेष्टनम् ।
मत्कथाश्रवणे भक्तिः स्वरनेत्राङ्गविक्रियाः ।
ममानुस्मरणं नित्यं यश्च मामेवोपजीवति ।
भक्तिरष्टविधा ह्येषा यस्मिन् म्लेच्छेऽपि वर्तते ।
स विप्रेन्द्रो मुनिः श्रीमान् स यतिः स च पण्डितः ।
क्वचिन्नवविधमुक्तम् । तद्यथा–
श्रवणं कीर्तनं शम्भोः स्मरणं पादसेवनम् ।
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ।
एवं नवविधा भक्तिः प्रोक्ता देवेन शम्भुना ।

संसारे वैराग्यमनन्तजन्ममरणदुःखानुभवजनितजुगुप्साविषयत्वादिति हेयत्वम्। उभयमपि लक्षणं लक्षयति ज्ञापयति प्रवर्तयति लक्षणं निदानप्रवर्तकमित्यर्थः। अनेन भक्तिवैराग्यवतामेव दीक्षायामधिकारः । तयोश्च शक्तिनिपात एव मूलं तस्य च कर्म साम्यम् । तदुक्तं श्रीमन्मृगेन्द्रे(५:४)–

येषां शरीरिणां शक्तिः पतत्यविनिवृत्तये ।
तेषां तल्लिङ्गमौत्सुक्यं मुक्तौ द्वेषो भवस्थितौ । इति ।
तथा वामदेवे–
शक्तिपातानुसरेण शिष्योऽनुग्रहमर्हति ।
यत्र शक्तिर्न पतिता तत्र शुद्धिर्न जायते ।
न विद्या न शिवाचारो न मुक्तिर्न च सिद्धयः ।
तस्मात् लिङ्गानि संवीक्ष्य शक्तिपातस्य भूयशः ।
ज्ञानेन क्रियया वाथ गुरुः शिष्यं विशोधयेत् ।
किरणे (५:८उ–९पू)–
तन्निपातस्य कालस्तु कर्मणस्तुल्यतैव हि ।
तुल्यत्वं कर्मणः[१९] कालः क्षणं वा यदि वा समम् । इति ।

कर्मणां न्यूनाधिकसम्बन्धे तु व्याकुलत्वमेव भोगेषु जायते । *तदभाव एव ततः शक्त्यधिगमः । स च कालवशादेव भवति । तदप्युक्तं

---

[१९] कर्मणः] C1, French Institute प्रकाशने च; कर्मणां C2, C3, C4

* एतच्चिह्नान्तर्गतभागः C2 मातृकायां न विद्यते ।

तत्रैव(५:१२उ–१३पू, १४उ–१६पू)
अधिकं न्यूनसम्बन्धाद्व्याकुलत्वं तु[२०] जायते* ।
अधिकन्यूनशून्यत्वाच्छक्तिमात्माधिगच्छति[२१] ।
अनादिबीजसम्बन्धाच्छिवः कालमपेक्षते ।
कालश्चित्र[२२] इति प्रोक्तस्तज्ज्ञश्च भगवाञ्छिवः ।
यथा कश्चिच्चले लक्ष्ये कंचित् कालमपेक्षते ।
तज्ज्ञोऽपि स शिवस्तद्वत् समकालमपेक्षते । इति ।

सा क्रिया दीक्षेति कथ्यते इति सम्बन्धः । एवं चात्मनः शिवत्वव्यक्तिदानात् पाशसम्बन्धनाशकत्वाच्च दीक्षेत्यर्थः । तदुक्तम्–

दीयते ज्ञानसद्भावः क्षीयते पाशसंचयः ।
दीयते क्षीयते योगात् दीक्षाशब्द इहोच्यते । इति ।

एवं च क्रियान्तरस्यैतत्फलद्वयप्रदत्वाभावान्नातिव्याप्तिः । शक्तिनिपाततारतम्येनैव प्रवृत्तायास्तस्याः फलद्वयमिति नाव्याप्तिश्च । एवं दीक्षालक्षणमभिधाय तत्प्रवर्त्तकं पशुलक्षणं वक्तुं पशुत्वातीतस्य दीक्षितस्य लक्षणमाह–

तस्मात् ज्ञानं च भक्तिश्च वैराग्यमिति चात्मनः[२३] ।
दीक्षितस्येह[२४] चिह्नानि पशोस्त्वेतानि नाञ्जसा ॥ ३ ॥

यस्माद्वैराग्यादिलक्षणं दीक्षा तस्मात् ज्ञानं शिव एव सर्वोत्तरः पशुपाशविमोचक इति ज्ञानं च तत एव शिवभक्तिश्च संसारे वैराग्यं च इत्येतत्त्रितयमपि दीक्षितस्यात्मन इह जन्मनि चिह्नानि लक्षणानि । तदुक्तं सिद्धान्तशेखरे–
विवेको जायते ज्ञानाद्धेयोपादेयवस्तुषु ।

---

[२०] व्याकुलत्वं तु] C3, C4; व्याकुलं तु C1; व्याकुलत्वं न French Institute प्रकाशने ।

[२१] शक्तिमात्माधिगच्छति C2, C3, C4

[२२] कालश्चित्र] C; कालच्छिद्रम् French Institute प्रकाशने ।

[२३] ज्ञानवैराग्यभक्तिश्च दीक्षितस्य च चिह्नकम् । अचिन्त्यविश्वसादाख्यागम, ४६: १० उ०

[२४] दीक्षितस्येह] C, R, T ; दीक्षितस्येव T2

विरक्तो हेयसंसारादुपादेयमपेक्षते ।
उपादेयं शिवं ज्ञात्वा तद्भक्तिं कुरुते ततः ।
भक्तिमार्गप्रवक्तारं गुरुमन्विष्यति स्थितम्[२५] ।
शिवेन गुरुणा मन्त्रैर्दीक्षया दीक्षितः पशुः ।
मुक्तो भवति संसारात् इति ।
तथा पौष्करे(४:३९–४१पू)
वैराग्यं जायते क्षिप्रं संसाराद्दुःखसागरात् ।
कदा द्रक्ष्यामि देवेशं मोक्ष्येऽहं बन्धतः कदा ।
को वा दर्शयिता शम्भोरिति संजायते मतिः ।
एवं संसारतो भीतमनुगृह्णाति चेश्वरः ।

ननु अदीक्षितस्यापि भक्तिज्ञानवैराग्याण्युपपद्यन्ते जन्मान्तरसुकृतवशादित्यत आह–पशोरिति। पशोरदीक्षितस्य एतानि भक्त्यादीनि अञ्जसा न सत्यानि भवन्ति। यद्यपि जन्मान्तरसुकृतवशात् सम्भवन्ति तथापि खद्योतप्रकाशादिव चञ्चलान्येव दीक्षितस्य तु शिवरूपगुरुकृपाकटाक्ष वशाद्वज्रकीलायितानीत्यर्थः। सत्येत्वाञ्जसाद्वयम् इत्यमरः । पशोस्त्वेतानि नाञ्जसा इत्युक्ते पशुपाशकलक्षणमपि दीक्षैव कारणमिति[२६] ज्ञापयितुं पशुलक्षणमाह–

किञ्चिज्ज्ञो मलिनो भिन्नः कर्ता भोक्ता स्वकर्मणाम् ।
शरीराढ्यो[२७] विभुर्नित्यः संस्कार्यः[२८] सेश्वरः पशुः[२९] ॥ ४ ॥

किञ्चित् जानातीति किञ्चिज्ज्ञः । न तु मुक्तवदस्य सार्वज्ञ्यमस्ति[३०] ।

---

[२५] अन्विष्यतेप्सितम् इति मुद्रितपाठः

[२६] कारणमिति] C1, C3, C4; कारणबीजमिति C2

[२७] शरीराढ्यो] C; शरीरान्यो M1; शरीरस्थो R

[२८] संस्कार्यः] C, M1, R ; संसार्यः T

[२९] पशुः] M1, C, R, T1; प्रभुः T

[३०] सार्वज्ञ्यमस्ति] C2, C3, C4; सर्वज्ञत्वमस्ति C1

अतः किञ्चिज्ज्ञत्वमेव पशोर्लक्षणम् । एतावतैव पतिपाशव्यावृत्तेः[३१] विभोः[३२] पत्युः[३३] सर्वज्ञत्वात् पाशस्याज्ञत्वाच्च । इतरेषां तु किञ्चिज्ज्ञत्वप्रतिपादक-विशेषणत्वमेवेत्याहुः[३४] । अत एवाह[३५] – मलिनः अनादिमलबद्धः । तदुक्तं श्रीमत्किरणे(२:२)* –

अनादिमलसम्बन्धान्मलिनत्वमणोः स्थितम् ।
अनादिमलमुक्तत्वान्निर्मलत्वं शिवे स्थितम् ।

अत एव भिन्नः ईश्वराद्व्यावृत्तः[३६] । न त्वीश्वर एव जीव इति भावः । मलिनत्वे हेतुमाह– स्वकर्मणां पुण्यपापानां कर्ता भोक्ता च परतन्त्रतयेति[३७] भावः । भोगे तु कर्मशब्देन सुखदुःखादिकमुच्यते । स्वशब्देन व्यवस्थितविषयत्वं भोगानामित्युच्यते । भोगे च साधनमाह– शरीराढ्य इति । शरीरैस्तत्तत्कर्मानुगुणैराढ्यः समृद्धः । अन्यथा तत्तद्विचित्रभोगानुपपत्तेः[३८] । ननु शरीराढ्यस्य परिच्छिन्नत्वेनानित्यत्वेन च कथं देशान्तरजन्मान्तरभाविकर्मफलभोक्तृत्वम् ? तत्राह– विभुर्नित्य इति। विभुः व्यापी परिपूर्ण इति । नित्यः त्रैकालिकाभावरहितः । देशान्तरभाविभोगहेतुर्विभुरिति जन्मान्तरभाविभोगहेतुर्नित्य इति । अन्यथा भोगे तद्धेतूनां वैयधिकरण्यापातात् । ननु भोगानामनन्तत्वादचेतनत्वादस्य च किञ्चिज्ज्ञत्वान्मलिनत्वाच्च कथं भोगेषु व्यवस्थितविषयत्वम् ? तत्राह–

---

[३१] पतिपाशव्यावृत्तेः] C1, C3, C4; पशुपाशव्यावृत्तेः C2
[३२] पदमिदं C2, C3, C4 मातृकासु नास्ति ।
[३३] पत्युः] C2, C3, C4; पतिः C1
[३४] °विशेषणत्वमेवेत्याहुः] C2, C3, C4; विशेषणमेवेत्याहुः C1
[३५] एवाह] C2, C3, C4; एव C1
* अनादिमलसम्बन्धात् किञ्चिज्ज्ञोऽसौ मयोदितः ।
अनादिमलमुक्तत्वात् सर्वज्ञोऽसौ ततः शिवः । इति French Institute प्रकाशने किरणागमे ।
[३६] ईश्वराद्व्यावृत्तः] C1, C3, C4; ईश्वरव्यावृत्तः C2
[३७] परतन्त्रतयेति] C2, C3; परतन्त्रं तथेति C1
[३८] °भोगानुपपत्तेः] C2, C3, C4; °भोगानामुपपत्तेः C1

सेश्वर इति । ईश्वरसहित[३९] ईश्वरपरतन्त्र इत्यर्थः । तदुक्तं पौष्करे (१:८६–८७पू)
अज्ञो जन्तुरनीशोऽयमात्मा यस्माद्द्विजर्षभाः ।
सोऽपि सापेक्षयैव स्यात् स्वप्रवृत्तौ घटादिवत् ।
इष्यते स कथं कर्ता कर्ता तस्मान्महेश्वरः । इति ।
एतत् पशुलक्षणं शतरत्नसंग्रहव्याख्याने प्रपञ्चितं नेह प्रतन्यते । एवं च कर्मणामनित्यत्वादस्य देशान्तरकालान्तरभाविफलभोक्तृत्वं कथमित्यत आह– संस्कार्यः । संस्कारो नाम कर्मजनितादृष्टविशेषः तदर्हः दीक्षासंस्कारार्हो वा । अयमेव पशुरित्युच्यते । एतच्च पशुलक्षणं सामान्यं विज्ञानकल–प्रलयाकलसकलरूपपशुत्रयलक्षणमुत्तरत्र वक्ष्यति । तथा च श्रीमत्सर्वज्ञानोत्तरे(१:४)–
पशुरात्मास्वतन्त्रश्च चिन्मात्रो मलदूषितः ।
सम्मूढो नित्यसंसारी किञ्चिज्ज्ञोऽनीश्वरोऽक्रियः । इति ।
एवं पशुलक्षणमुक्त्वा मलादिपाशत्रयस्यापि दीक्षायां शोध्यत्वेन तज्ज्ञानस्यापि प्रवर्तकत्वमिति सूचयितुं पाशलक्षणमाह–

पाशा अपि त्रयो ज्ञेया मलो माया च कर्म च ।

अत्र मलस्य विज्ञानकलप्रलयाकलसकलानां त्रयाणामपि मुख्यपाशत्वात् प्रथममुद्देशः । अनन्तरं *विज्ञानकलव्यतिरिक्तयोर्द्वयोरपि पाशत्वान्मायायाः सकलस्यैव पाशत्वादनन्तरं कर्मण इति । अत्र मलिनीकरोति आत्मानं स्वतःसिद्धे* ज्ञानक्रिये छादयतीति मलः स चानादिरेव । यदुक्तं श्रीमत्स्वायम्भुवे–
अथानादिर्मलः[४०] पुंसाम् इति । अस्य पाशपदार्थत्वेऽपि पशुत्वेऽप्यन्तर्भावः[४१]। तेन विना पशुत्वस्यैवाभावात् । अत एवोक्तं पशुः

---

[३९] ईश्वरसहितः] C1, C3, C4; पदमिदं C2 मातृकायां नास्ति ।
* एतच्चिह्नान्तर्गतो भागः C2 मातृकायां न विद्यते ।
[४०] अथानादिर्मलः] C2, C3, C4; अथानादिमलः C1 मातृकायां तथा मुद्रिते सद्योज्योतिष्कृतव्याख्यासहिते स्वायम्भुवसूत्रसंग्रहे च ।
[४१] पशुत्वेऽप्यन्तर्भावः] C1, C3, C4; पशुत्वेऽन्तर्भावात् C2;

पशुत्वसंयोगात् इति । ननु चैतन्यं दृक्क्रियारूपं तदस्त्यात्मनि सर्वदेति[४२] मृगेन्द्रादिवचनेन[४३] सर्वज्ञत्वसर्वकर्तृत्वचिन्मयादिरूपशिवत्वमात्मन्यपि सर्वदास्तीति प्रतिपाद्यते । मलस्यानादित्वेन तत्सम्बन्धिपशुत्वमपि प्रतिपाद्यते। अतः कथं परस्परं परिहारेण[४४] वर्तमानयोः शिवत्वपशुत्वयोस्तेजस्तिमिरयोरिव कथमेकात्मवर्तित्वमिति चेत्, सत्यम् । आत्मनः सर्वज्ञत्व-सर्वकर्तृत्वादिशिवत्वमनादिसिद्धमप्यनादिमलदूषितत्वात् ताम्रगत-तत्कालिमावृतहेमत्ववद्विषयग्रहणशक्तेः प्रतिबद्धत्वादन्तर्लीनं स्वविषयमेवावतिष्ठते । न तु स्वरूपनाशनेनात्मनि जडत्वं तेनापादितम्[४५]। न च यद्येवं नित्यत्वव्यापकत्वादिवदात्मनः पशुत्वस्याप्यनादि-मलदूषितत्वेनानिवर्त्यत्वमेव स्यादिति वाच्यम् । रसविद्धताम्रस्य[४६] हेमत्वाभिव्यक्तिरिव ज्ञानसिद्धात्मनोऽपि शिवत्वाभिव्यक्त्युपपत्तेः । तदुक्तं सर्वज्ञानोत्तरे (१:६)–

रसविद्धं[४७] यथा ताम्रं हेमत्वं प्रतिपद्यते[४८] ।
तथात्मा ज्ञानसम्भिन्नः शिवत्वं प्रतिपद्यते । इति ।

अत्र ज्ञायते अनेन सर्वमिति सर्वविषयज्ञानव्यञ्जकेन दीक्षाख्येन गुरुरूपशिवव्यापारेण संयुक्तो ज्ञानसम्भिन्न इत्यर्थः । चक्षुःपटलस्य वैद्यव्यापारेणैवात्ममलस्यापि[४९] दीक्षाख्येन ईश्वरव्यापारेणैव निवृत्तिसिद्धेः अत एव

अथात्ममलाख्यकर्मबन्धविमुक्तये ।

---

[४२] सर्वदेति] C1, C3; सर्वदेत्यादि C2, C4
[४३] मृगेन्द्रादिवचनेन] C2, C3, C4; °दर्शनेन C1
[४४] परस्परं परिहारेण] C1; परस्परपरिहारेण C2, C3, C4
[४५] आत्मनि जडत्वं तेनापादितम्] C3, C4; आत्मनिजसत्वं तेनापादिततम् C2; आत्मनि जडत्वं तेनापादि C1
[४६] रसविद्धताम्रस्य] C1, C3, C4; रससिद्धताम्रस्य C2
[४७] रसविद्धं] C1, C3, C4; रससिद्धं C2
[४८] प्रतिपद्यते] C2; प्रतिपाद्यते C1, C3, C4
[४९] °व्यापारेणात्ममलस्यापि] C1, C3, C4; °व्यापारेणात्मबलस्यापि C2

व्यक्तये च शिवत्वस्य शिवाज्ज्ञानं प्रवर्तते[५०]

इति स्वायम्भुववचनस्य शिवाद्दीक्षा प्रवर्तत इति व्याख्यातमाचार्यैः । अत एव तत्रैव–दीक्षैव मोचयत्यूर्ध्वं शैवं धाम नयत्यपीत्युक्तम् । ननु दीक्षायाः कर्मत्वात् ज्योतिष्टोमादेरिव बन्धकत्वमेव न तु मोक्षहेतुत्वं स्यादिति चेत् सत्यम् । यथा जाङ्गलिको *मन्त्रसामर्थ्येन ध्यानादिकर्मणा च विषनिर्हरणं करोति तथाचार्योऽपि शिवशक्त्युपबृंहितदीक्षारूपकर्मणैव मलादिपाशविश्लेषं शिवत्वाभिव्यक्तिमपि करोत्येव* । तथा चोक्तं सर्वज्ञानोत्तरे (१:८)–

विषापहारं कुरुते ध्यानबीजबलैर्यथा ।
कुरुते पाशविश्लेषं तथाचार्यः शिवाध्वरैः । इति ।

किञ्च प्रायश्चित्तादिकर्मणा दुष्कृतेभ्यो मोक्षः श्रूयते एवमिहापि पाशमोक्ष इति न विरोधः । ननु मलस्यादित्वान्नित्यत्वाभ्युपगमाच्च आत्मावारकत्वमग्नेरौष्ण्यमिव स्वतःसिद्धमेव । एवं च मलविनाश एव तदावारकत्वनाशः सम्भवति । वह्निनाशे औष्ण्यनाशवदिति चेन्न । मलस्य नित्यत्वान्नाशो न सम्भवति । किन्तु मलादिपाशानां बन्धकत्वनिवृत्तिरेव विषग्रन्थेर्मारकत्वशक्तिनिवृत्तिवत्[५१] क्रियते दीक्षयेत्यविरोधः । मलस्य[५२] जडत्वे सत्यनेकत्वे घटादिवदनित्यत्वं प्रसज्यते । तथा चैकत्वमेवाभ्युपगन्तव्यम् । तथा च सत्येकमोक्षार्थं तन्निरोधे[५३] सति सर्वमुक्तिप्रसङ्ग इति चेत्तन्न । मलस्यैकत्वेऽपि अनेकात्मावारकानेकशक्तिमत्त्वेनाभ्युपगमात् । तथा चोक्तं श्रीमन्मृगेन्द्रे(७:८)–

प्रत्यात्मस्थस्वकालान्तापायशक्तिसमूहवत् । इति ।

चिन्त्यविश्वे–

आणवस्त्वेकरूपो हि तथा विविधशक्तिमान् ।
ताम्रकालिकवत् सोऽपि सहजो नान्तरागतः ।

---

* एतच्चिह्नान्तर्गतभागः C2 मातृकायां न विद्यते ।

[५०] प्रवर्तते] C1 ; प्रवर्तत इति C2, C3

[५१] ॰मारकत्वशक्तिनिवृत्तिवत्] C1, C3; ॰मारकत्वनिवृत्तिवत् C2

[५२] मलस्य] इ१ ; ननु मलस्य C2, C3

[५३] तन्निरोधे] C1, C3; सत्येकमोक्षात्यन्तं निरोधे C2

तण्डुले च यथा कम्बुतुषकं सहजं तथा ।
सहजो मल इत्युक्त इति । एवं च मलस्यैकशक्तिपाकेन तन्निरोधे तदावारितस्यैव[५४] मुक्तिर्नान्यस्येति सिद्धमित्यलं विस्तरेण ।
माया जगत्कारणं वस्तु[५५] नित्या च न तु वेदान्तिनामिव मिथ्यारूपा ।
तदुक्तं तत्त्वप्रकाशे(१९ उ)–
माया च वस्तुरूपा मूलं विश्वस्य नित्या सा । इति ।
कर्म धर्माधर्मात्मकं वेदसिद्धं वेदैकसमधिगम्यत्वात् तस्य ।
तथोक्तं स्वायम्भुवे–
धर्मशासनसंवित्तिराम्नायादेव जायते । इति ।
यथोद्देशं लक्षणमाह–

मलं[५६] चाशुद्धिरज्ञानं तच्चैतन्यनिरोधकम् ॥ ५ ॥

अशुद्धिरित्येव मललक्षणम् । साचाशुद्धिः कीदृशीत्यत आह– अज्ञानमिति ज्ञानविरोधीत्यर्थः । तदभावतद्विरोधतदन्यत्वेषु नञर्थेष्वत्र नञो विरोधार्थत्वमत एवाह– तच्चैतन्यनिरोधकम् । आत्मनः स्वतःसिद्ध-सर्वज्ञत्वादिगुणनिरोधकमित्यर्थः । मायालक्षणं कार्यमुखेनाह–

माया कलादिपृथ्व्यन्ता यद्भवा[५७] तत्त्वसंहतिः ।

कलादिपृथ्व्यन्ता कला आदिः पृथिवी ततो यस्याः सा तत्त्वसंह-तिस्तत्त्वसमूहः । यद्भवा यस्याः सकाशात् भवतीति सा माया । कलादिपृथ्व्यन्ततत्त्वोपादानकारणं मायेत्यर्थः । अथ कर्मलक्षणमाह–

धर्माधर्मात्मकं कर्म

स्पष्टमेतत् । एतच्च पाशत्रयं कस्येत्यत आह–

---

[५४] तदावारितस्यैव] C1, C3; तदावरितस्यैव C2

[५५] वस्तु C1; वस्तुभूता C2, C3

[५६] मलः] M1, T2; मलं C, R, T1

[५७] यद्भवा] M1, C ; तद्भवा T2, R; यद्भावा C

एतैः[५८] पाशैर्युतः पशुः ॥ ६ ॥

एतैः पाशैर्मलेन केषांचिन्मलमायाभ्यां केषांचिन्मलमायाकर्मभिस्त्रिभिरपि केषांचिद्बन्धेन पशुत्वमित्यर्थः । एवं च पाशबद्धत्वमेव पशुत्वमिति निकृष्टलक्षणं[५९] सूचितं भवतिं । एतत्पाशत्रयकार्यं पशोर्दर्शयति–

पशोरज्ञतया मायायोगो भोगाय कर्मणाम् ।*

पशोरज्ञतया भोगः मलावृतचैतन्यत्वेन मायायोगः कलादिपृथ्व्यन्ततत्त्वसम्बन्ध एव[६०] पुर्यष्टकसम्बन्ध एवेत्यर्थः[६१] । कर्मणां भोगाय सुखदुःखानुभवाय भवतीति शेषः । स्वायम्भुवे–

भोगोऽस्य वेदना पुंसः सुखदुःखादिलक्षणा । इति ।

तत्त्वसंग्रहे (२४उ–२५पू) सद्योज्योतिराचार्यैः–

वसुधाद्यस्तत्त्वगणः प्रतिपुंनियतः कलान्तोऽयम् ।
पर्यटति कर्मवशतो भुवनजदेहेष्वयं च सर्वेषु । इति ।

श्रीमन्मृगेन्द्रे च (१२: ३१उ)–

प्रयोक्त्र्यादिमहिप्रान्तमेतदण्वर्थसाधकम् । इति ।

पौष्करे(४:१९पू)–

प्रतिपुंनियतं तत्त्वं कलाद्यवनिपश्चिमम् । इति ।

तत्त्वप्रकाशेऽपि(११उ–१२पू)–

पुर्यष्टकदेहयुता योनिषु निखिलासु कर्मवशात् ।
स्यात् पुर्यष्टकमन्तःकरणं धीकर्मकरणानि । इति ।

ननु श्रीमत्कालोत्तरे–

शब्दः स्पर्शश्च रूपं च रसो गन्धश्च पञ्चमम्[६२] ।

---

[५८] कर्म एतैः] T2, C; कर्मेत्येतैः R, T
[५९] निष्कृष्टं लक्षणं] C3; निकृष्टं° C1
[६०] °तत्त्वसम्बन्ध एव C3; °तत्त्वसम्बद्धमेव C1
* त्रिबन्धिचित्कलायोगभोगविश्लेषमोक्षदम् । (भोगकारिका , १पू)
[६१] पुर्यष्टकसम्बन्ध एवेत्यर्थः] C3; पुर्यष्टकसम्बद्धमेवेत्यर्थः C1
[६२] पञ्चकम् C1, C3

बुद्धिर्मनस्त्वहंकारः पुर्यष्टकमुदाहृतम् इति श्रूयते । अतः कथं कलादिपृथ्व्यन्ततत्त्वात्मकमिति चेत् , सत्यम् , एतत्सूत्रव्याख्यानावसरे तत्रभवता रामकण्ठेन मृगेन्द्रानुरोधेन त्रिंशत्तत्त्वपरतयैव व्याख्यातम् । तर्हि[६३] कथमस्य पुर्यष्टकत्वमित्याशङ्कायां भूततन्मात्रबुद्धीन्द्रिय-कर्मेन्द्रियान्तःकरणसंज्ञैः पञ्चभिर्वर्गैस्तत्कारणे तद्गुणतत्त्वेन तदापूरकेण प्रधानेन च भोक्तृत्वस्वरूपोपकारकेण कलादिपञ्चकञ्चुकात्मना च त्रिवर्गेणारब्धत्वादित्यविरोध इत्यघोरशिवाचार्यैः परिहृतम्[६४] ।

नन्वेवमनादिपाशत्रयबन्धादस्यात्मनः कथं मुक्तिरित्यत आह–

समयादीश्वरेच्छातो[६५] मुक्तिर्नास्त्यन्यथा[६६] यतः ॥ ७ ॥
ततः सुखादिकं कृत्स्नं भोगं[६७] भुङ्क्ते स्वकर्मतः ।

अस्य पशोः समया आदिर्यस्या ईश्वरेच्छाया दीक्षाख्यायास्तत एव समय-विशेषनिर्वाणाभिधानदीक्षा तयैव मुक्तिः पाशत्रयमोक्षो भवतीति शेषः । अन्यथा शास्त्रान्तरसिद्धप्रकारान्तरेण यतो यस्मात् कारणान्न भवत्येव मुक्तिः शास्त्रान्तरसिद्धानां मुक्तीनां शिवतत्त्वाधस्तनतत्तत्त्वप्राप्तिरूपत्वेन सातिशयत्वेन पुनरावृत्तिमत्वेन च पाशत्रयबन्धविमोक्षाभावत्वेन न मुक्तत्वम्[६८] । अस्यास्तु सर्वोत्तरशिवपदप्राप्तिरूपत्वात् पुनरावृत्तिरहितत्वात् पाशत्रयबन्धविमोक्ष-परत्वाच्च यथार्थत्वम् । तदुक्तम्–

चार्वाकाः कौलिका ज्योतिःशास्त्रज्ञाश्चैव भौतिकाः ।
तन्मात्रसिद्धाः स्मार्ताश्च चक्षुरादीन्द्रियं परे ।
वैशेषिकास्त्वहङ्कारे गुणेषु न्यायवादिनः ।

---

[६३] तर्हि] C3; तस्य C1

[६४] अयं व्याख्याभागः अघोरशिवाचार्याणां तत्त्वप्रकाश, १२ तमश्लोकव्याख्यानं पदशः अनुसरति । तत्त्वप्रकाश, १२ तमश्लोकस्य अघोरशिवाचार्यवृत्तिं पश्यत ।

[६५] समयादीश्वरेच्छातो] C, T, T2; समायातीश्वरेच्छातो M1, R

[६६] मुक्तिर्नास्त्यन्यथा] C; मुक्तिर्नास्यान्यथा M1, R, T, T2

[६७] कृत्स्नं भोगं] M1, T2, C, R ; कृत्स्नभोगं T

[६८] मुक्तत्वम्] C1; मुक्तित्वम् C3

बुद्धितत्त्वे स्थिता बौद्धा गुणेष्वार्हताः स्थिताः ।
प्रकृतौ पञ्चरात्रज्ञा मन्यन्ते प्रकृतिं हरिम् ।
वेदान्तज्ञाश्च सांख्याश्च योगिनः पुरुषे स्थिताः[६९] ।
श्रीमन्मृगेन्द्रे(२:२८)–
यत् कैवल्यं पुंप्रकृत्योर्विवेकाद्यो वा सर्वं ब्रह्म मत्वा विरामः ।
या वा काश्चिन्मुक्तयः पाशजन्यास्तास्ताः सर्वा भेदमायान्ति सृष्टौ ।
शैवे सिद्धो भाति मूर्ध्नीतरेषां मुक्तः सृष्टौ पुंवरोऽभ्येति नाथः ।
विश्वानर्थान् स्वेन विष्टभ्य धाम्ना सर्वेशानानीरितः सर्वदास्ते । इति ।
ततः शास्त्रान्तरेण मुक्त्यभावादेव[७०] स्वकर्मतः स्वकृतपुण्यपापैरेव सुखादिकं सुखदुःखादिरूपं कृत्स्नं भोगं भुज्यत इति भोगः तं भुङ्क्ते अनुभवति ।
अथ मुक्तं च फलफलितभावमाह–

संसारी[७१] स पशुर्बद्धो मुक्तः पाशत्रयोज्झितः ॥ ८ ॥

पाशत्रयबन्धवशादनेकजन्ममरणसुखदुःखेषु संसरतीति संसारी । स पशुर्बद्धः पाशत्रयबन्धनात् बद्ध इत्युच्यते । पाशत्रयोज्झितः दीक्षया पाशत्रयविमोचितो मुक्त इत्युच्यते । तथा सुप्रभेदे–
मलैरावृत[७२] आत्माऽसौ पशुरित्युच्यते बुधैः ।
मलैर्मुक्त अथात्माऽसौ[७३] मुक्त[७४] इत्युच्यते बुधैः ।
ननु दीक्षया पाशत्रयविमुक्तिरित्युच्यते । तत्र सर्वेषामप्यात्मनां पाशत्रयेणापि

---

[६९] पाशुपतास्तु मायायां विद्यायां तु महाव्रताः ।
शक्तितत्त्वे तदद्वैताः शिवतत्त्वे परे स्थिताः ॥ इति C3 मातृकायामधिकं वर्तते ।

[७०] मुक्त्यभावादेव] C1, C3; मुक्त्यभावे C2

[७१] संसारी] M1, T1, C, R; संसर्ग T

[७२] मलैरावृत] C2, C3; मलेनावृत C1

[७३] मलैर्मुक्त अथात्मासौ] C1; मलैर्मुक्तमथात्मानं C2, C3

[७४] मुक्त C1; शुद्ध C2, C3

* एतच्चिह्नान्तर्गतभागः C2 मातृकायां नास्ति ।

बन्धो वा इति कस्यचित् केनचित् बन्धो वा इत्याशङ्क्य तद्विवेकं वक्तुं पशुभेदमाह–

*त्रिधा सोऽयमनुग्राह्यः सकलः प्रलयाकलः ।
विज्ञानाकल[७५] इत्येषां स्वरूपमधुनोच्यते ॥ ९ ॥

अनुग्राह्यः दीक्षारूपशिवानुग्रहविषयः[७६] सोऽयं पूर्वोक्तबद्धपशुः[७७] त्रिधा त्रिप्रकारः जातावेकवचनम् । तानेव प्रकारानाह– सकलः कलाबन्धसहितः प्रलयाकलः प्रलये कलाबन्धसहितः[७८] विज्ञानकलः विज्ञानेन साक्षादीश्वरज्ञानशक्त्या कलाबन्धसहितः[७९] इत्येवं त्रिविधः । एषां लक्षणापरिज्ञाने दीक्षायां प्रवृत्तिरेव नोपपद्यत इति लक्षणं वक्तुं प्रतिजानीते– एषां स्वरूपं लक्षणमपि अधुनोच्यते[८०]*
एतद्ज्ञानमपि दीक्षाभेदेषु अधिकारभेदविषयज्ञानमपि दीक्षाबीजमिति भावः। उद्देशक्रमेणलक्षणमाह–

मायाकर्ममलच्छन्नः सकलः सोऽभिधीयते ।
मलकर्मावृतो यस्तु स भवेत् प्रलयाकलः ॥ १० ॥
मलैकबन्धसम्बद्धो[८१] विज्ञानाकल[८२] उच्यते ।

तथा चिन्त्यविश्वे–
मलयुक्तस्तत्राद्यो मलकर्मयुतो द्वितीयः ।
स्यात् मलमायाकर्मयुतः सकल । इति ।
अनादिभूताभ्यां मलमायाभ्यां प्रवाहानादिना कर्मणा चावच्छिन्नः

---

[७५] विज्ञानाकल] T, R; विज्ञानकल M1, C
[७६] दीक्षारूपशिवानुग्रहविषयः] C3; दीक्षारूपशिवानुभवमाह विषयः C1
[७७] पूर्वोक्तबद्धपशुः] C3; °बद्धः पशुः C1
[७८] कलाबन्धरहितः] C3; °सहितः C1
[७९] कलाबन्धरहितः] C3; °सहितः C1
[८०] एषां स्वरूपं लक्षणमपि अधुनोच्यते] C3; एषां स्वरूपलक्षणमधुनोच्यते C1
[८१] मलैकबन्धसम्बद्धो] C, R; मायैकबन्धसम्बन्धो T2
[८२] विज्ञानाकल] T, T1, M1, R; विज्ञानकल C1

सकलोभिधीयते कलायुक्तोऽभिधीयते । पुरुषस्य सहजे ज्ञत्वकर्तृत्वे एकदेशमलविदारणेन[८३] या[८४] कलयति[८५] व्यञ्जयति सा कला । तदुक्तं चिन्त्यविश्वे (३७: ३४ उ–३६)–

सैव माया पुनश्चैव कलामजनयत् क्रमात् ।
अणूनामाणवं[८६] चैव मलमेकत्र भिद्य च ।
ज्ञानशक्तौ प्रतिष्ठाप्य व्यञ्जयेत् कर्तृशक्तिकाम् ।
कलाबन्धनया त्वर्थस्तु न बन्धात्म चात्मनाम् ।
कलातत्त्वमिदं प्रोक्तमणूनां भोगकारणात् ।

ननु आत्मनो ज्ञत्वकर्तृत्वाभिव्यञ्जनकरी कलेत्युच्यते तच्च शिवशक्त्यैव जायतां किं कलयेति चेन्न । शिवस्तु पाशं विनाऽऽत्मनो ज्ञत्वकर्तृत्वशक्तिं न व्यञ्जयति । यथा वातपित्तदोषो[८७] अपथ्यं विना रोगजनितोपद्रवं न करोति । तथा चोक्तं तत्त्वसंग्रहे(१८)–

पाशं तु विना नेशो व्यञ्जयति यतो न सर्वविषयं तत् ।
दोषो विषमोऽपथ्यं[८८] विनैव नो रोगकर्तृशक्तिमिव । इति ।

नन्वात्मनो भोगार्थमेव ज्ञतृत्वकर्तृत्वव्यञ्जनार्थं कला अङ्गीक्रियते तच्च भोगकारणेन कर्मणैव भवतु तदभावेन विज्ञानकलानां भोगाभावादिति चेत्, कर्मणां भोगजननमात्रोपक्षीणत्वात् कार्यान्तरहेतुत्वे प्रमाणाभावाच्च । किं

---

[८३] ०मलविदारणेन] C3; ०मलविदारंणे C1

[८४] या] C1 ; या C3

[८५] कलयति] C3; कला इति C1

[८६] अणूनामाणवं] C1; अन्यूनमाणवं C3

[८७] वातपित्तदोषो] C1; वातपित्तादिः C3

[८८] अस्मिन् श्लोके अघोरशिवाचार्यव्याख्यानुसारेण विषमोऽपथ्यम् इत्यनेनैव भवितव्यं। परं तु तत्त्वसंग्रहस्य १९२३ तमवर्षे देवकोट्टैनगरात् कृतप्रथमप्रकाशने, तथा १९८८ तमवर्षे वाराणसीनगरस्थात् सम्पूर्णानन्दसंस्कृतविश्वविद्यालयात् कृतद्वितीयप्रकाशने च विषमो पथ्यं इत्येव वर्तते । किन्तु, P.S. Filliozat महाशयैः चतुर्मातृकाधारेण परिशोधिते तथा Paris नगरात् प्रकाश्यमान Bulletin de l'Ecole Français de l'Extrême Orient नामकवार्षिकपत्रिकायां १९८८ तमे वर्षे प्रकाशिते अघोरशिवव्याख्या–सहिततत्त्वसंग्रहस्य रोमलिपिबद्धे तृतीयप्रकाशने ७७ तमपुटे विषमोऽपथ्यम् इति पाठः गृहीतो दृश्यते ।

च तत्त्वान्तरसहकृतस्यैव कर्मणो भोगनिमित्तत्वाभावे बुद्ध्यादितत्त्वा-नामप्यनर्थकत्वं स्यात् । ननु तर्हि कलायोगेनैवात्मनो ज्ञानदर्शने पूर्वम-विद्यमानमेव ज्ञानं कलायोगेनोत्पद्यते इन्द्रियसन्निकर्षात् घटज्ञानमिव । एवं चात्मनो ज्ञानाधारत्वमेव न तु ज्ञानरूपत्वमिति चेन्न। आत्मनोज्ञत्वाभावस्तु न त्वविद्यमानत्वात् किन्तु व्यञ्जकाभावादेव । यथान्धकारावृतस्य घटस्याज्ञानं व्यञ्जकदीपाद्यभावादेव न त्वभावात् एवं च तस्यानित्यज्ञानत्वाभ्युपगमे विकारयोगेन तस्याप्यनित्यत्वप्रसङ्गात् । व्यञ्जकसन्निधान एव ज्ञातृत्वरूपस्य स्वसंवेदनसिद्धत्वाच्च नित्यमेवात्मनश्चेतनात्मत्वमङ्गीकर्तव्यम् । तच्चानादिमलावृतत्वात् व्यञ्जकीभूतकलायोगात् पूर्वं न प्रकाशते । तद्योगत एव प्रकाशत इत्यन्वयव्यतिरेकाभ्यां कलासम्बन्धोऽङ्गीकर्तव्यः । तद्योगादेवात्मनः सकलत्वमित्यलं विस्तरेण । अयं च पाशत्रयसम्बन्धो भवति । मलकर्मावृतः अनादिरूपेण मलेन कर्मणा चावृतो यः स प्रलयाकल इत्युच्यते । प्रलयेन कलादेरुपसंहारात् । मलैकबन्धसम्बद्धः बध्यते अनेनेति बन्धः पाशः मलाख्येनैकेनैव पाशेन सम्बन्धो यः स विज्ञानकल इत्युच्यते। विज्ञानयोगसंन्यासैर्भोगाद्वा कर्मणः क्षय इति विज्ञानेन कर्मणस्तद्भो-गार्थकलादिबन्धस्याप्यभावात् । अत्र सकलप्रलयाकलो विज्ञानाकल इति जातावेकवचनम् । ते च सकलाः परिपक्वमला अपरिपक्वमलाश्चेति द्विविधाः[८९] । तत्र परिपक्वमलाः शिवरूपाचार्यकृतदीक्षया मोक्षगामिनः ।

तदुक्तम्-

परिपक्वमलानेतानुत्सादनहेतुशक्तिपाते ।
योजयति परे तत्त्वे स दीक्षयाचार्यमूर्तिस्थ । इति ।

अन्ये तु संसारिणः प्रलयाकलाश्च परिपक्वमलकर्मापरिपक्वमलकर्माणश्च[९०] । तत्र परिपक्वमलकर्मणः शिवो निरधिकरणदीक्षयैव मोक्षं प्रापयति । तदुक्तं श्रीमृगेन्द्रे(५:१)-

---

[८९] द्विविधाः] C1; द्वेधा C3
[९०] परिपक्वमलकर्मापरिपक्वमलकर्माणश्च] C1; परिपक्वमलकर्माणोऽपरिपक्वमलकर्माणः C3

तमःशक्त्यधिकारस्य निवृत्तेस्तत्परिच्युतौ ।
व्यनक्ति दृक्क्रियानन्त्यं जगद्बन्धुरणोः शिवः ।
स्वायम्भुवे–
क्षीणे तस्मिन् यियासा स्यात् परं निश्रेयसं प्रति । इति ।
अन्ये तु पुर्यष्टकदेहयुक्ताः सन्तो भुवनजशरीरयोगिनः । एतेष्वपि केचित् पाकतारतम्येनानन्तेश्वरकृपया गुह्यातिगुह्यगुह्यतरपवित्रस्थाण्वाख्य–पञ्चाष्टकभुवनपतित्वं प्राप्य स्वाधिकारान्तं प्रकटीकृतज्ञानक्रियाणिमादियुक्ता भवन्ति । तदुक्तं तत्त्वप्रकाशे(१२उ)–
कांश्चिदनुगृह्य वितरति भुवनपतित्वं महेश्वरस्तेषाम् । इति ।
विज्ञानकलाश्च पक्वमलापक्वमलभेदेन द्वेधा । तत्र पक्वमला[११] विद्येशपदयोगिनः । अन्ये तु सप्तकोटिमहामन्त्राः । तत्राप्यर्धं निरवधिकरणशिवानुग्रहकरणं भवति । अन्यदर्धं साधिकरणशिवानुग्रहस्य करणमिति । तदुक्तं श्रीमन्मृगेन्द्रे(४:७–८)–
प्रयोक्तृदेहसापेक्षं तदर्धमखिलेऽध्वनि ।
कृत्वाधिकारं स्थित्यन्ते शिवं विशति सेश्वरम् ।
विनाधिकरणेनान्यत् प्रधानविकृतेरधः ।
कृत्वाधिकारमीशेष्टमपैति स्वाध्वसंहृतौ । इति ।
तथा चैतन्मन्त्रबलादेव साधकानामभिलषितभुवनभोगो मोक्षश्च[१२] भवति ।
श्रीमत्सूक्ष्मस्वायम्भुवे–
यो यत्राभिलषेद्भोगांस्तत्रैव नियोजितः ।
सिद्धिभाङ्मन्त्रसामर्थ्यात् तत्तद्वाभ्यास्तस्तथेति ? ।
श्रीमद्रौरवे च–
दीक्षापूता गणपतिगुरोर्मण्डले जन्मवन्तः
सिद्धा मन्त्रैस्तरुणदिनकृन्मण्डलोद्भासिदेहाः ।
भुक्त्वा भोगान् सुचिरममरस्त्रीनिकायैरुपेताः

---

[११] तत्र पक्वमला] C3; पक्वमला C1
[१२] °भुवनभोगो मोक्षश्च] C3; भुवनभोगमोक्षश्च C1

स्रस्तोत्कण्ठाः परशिवपदैश्वर्यभाजो[१३] भवन्ति । इति ।

ननु सकलानां दीक्षया बन्धनिवृत्तिर्जायत इत्युच्यते । कथमेतत् ज्ञातुं शक्यमिति चेदुच्यते । श्रीमत्कालोत्तराद्युक्तवन्मन्त्रालब्धधटारोपणेन तस्यात्मनो गौरवं परीक्ष्य पश्चादुत्घातमन्त्रोच्चारणादिपूर्वं तच्छुद्धिं कृत्वा पुनर्धटारोपणे तस्य लाघवमुत्पाद्यमानं दृश्यते[१४] । विषाविष्टस्याहितुण्डिकक्रियातः पूर्वं पश्चादिव चेति वदन्ति । तथा च तत्त्वसंग्रहे (३६)–

शुद्धिं व्रजति तुलायां दीक्षातो ब्रह्महत्यातो मुख्यात् ।
प्रत्ययतो जानीयात् बन्धनविगमं विषक्षयवत् । इति ।

ननु दीक्षया समस्तपाशक्षये सति तत्क्षणमेव शरीरपातप्रसङ्ग इति चेत् , सत्यम् । दीक्षा च द्विविधा असद्योनिर्वाणा सद्योनिर्वाणा चेति । तत्रासद्योनिर्वाणदीक्षया जन्मान्तरफलप्रदानामेव कर्मणां दाहेन प्रारब्धकर्मणां भोगार्थमवस्थापनमेव[१५] । तदुक्तं श्रीमत्किरणे (६:२०)–

अनेकभाविकं कर्म दग्धबीजमिवाणुभिः ।
भविष्यदपि संरुद्धं येनेदं तद्धि भोगतः । इति ।

सद्योनिर्वाणदीक्षायां तु प्रारब्धकर्मणामपि क्षयो भवत्येव । तथापि किंचित् कालं शरीरस्थितिमात्रं सम्भवति । तदुक्तं श्रीमत्किरणे (६:१८–१९)

गरुडः– अशेषपाशविश्लेषो यदि देव स दीक्षया ।
जातायामर्थनिष्पत्तौ कथं स्याद्वपुषः स्थितिः ॥
भगवान्– जातायां घटनिष्पत्तौ यथा चक्रं भ्रमत्यपि ।
पूर्वसंस्कारसंसिद्धं तथा वपुरिदं स्थितम् । इति[१६] ।
तिष्ठति संस्कारवशाच्चक्रभ्रमवद्धृतशरीर इति[१७] ।

---

[१३] शिवपदपरैश्वर्यभाजो इत्यपि पाठान्तरम् । सम्पूर्णानन्दसंस्कृतविश्वविद्यालयात् प्रकाशितस्य अष्टप्रकरणग्रन्थस्य १२८ तमपुटं पश्यत ।

[१४] श्रीमत्कालोत्तराद्युक्तवत् . . . दृश्यते इत्ययं वाक्यं तत्त्वसंग्रहस्य ३६ तमश्लोकस्य अघोरशिवव्याख्यानवाक्यमेव ।

[१५] भोगार्थमवस्थापनमेव] C3; भोगार्थमवस्थापितमेव C1

[१६] किरणागम, विद्यापाद, ६:१८–१९

[१७] इदं श्लोकार्धं उपर्युद्धृतकिरणागमसूत्रस्य भट्टरामकण्ठेन स्ववृत्तौ उद्धृतम् । परन्तु अस्य मूलं न निर्दिष्टम् ।

ननु असद्योनिर्वाणदीक्षायाम् एष्यज्जन्मान्तरफलप्रदकर्मणां दाहेऽपि प्रारब्धकर्मणां भोगार्थमवस्थाने दीक्षोत्तरकालशरीरावस्थानेन क्रियमाणकर्मणां का गतिः ? साङ्गात् कृतात् कर्मणः फलावश्यंभावनियमात् अननुष्ठाने च[९८] निषिद्धकर्मानुष्ठाने च,

इति वर्णाश्रमाचारान् मनसापि न लङ्घयेत् ।
यो यस्मिन्नाश्रमे तिष्ठन् प्राप्तो दीक्षां शिवात्मिकाम् ।
स तस्मिन्नेव संतिष्ठञ्छिवधर्मं च पालयेत् । इति* ।

आज्ञाविलङ्घनात् प्रोक्तं क्रव्यादत्वं शतं समा इत्यादिवचनैरकरणात् प्रत्यवायश्रवणाच्चेति चेत् , उच्यते । दीक्षोत्तरकालमनुष्ठीयमानकर्मणां न जन्मान्तरभाविफलावहत्वं[९९] किन्तु दग्धपटन्यायेनावस्थानम् ।

तदुक्तं तत्त्वसंग्रहे (३८पू)–

कृतमपि फलाय न स्याद्दीक्षोपयूषरोप्तबीजमिव इति ।

किं च दीक्षोत्तरकालमकृतसमयाचाराणामाज्ञाविलङ्घनदोषेण किंचित् कालं पिशाचराजतामनुभूय तदनन्तरं मुक्तिः । तता चोक्तं तत्त्वसंग्रहे (३९)–

तस्मादप्यकृतविधिः किंचित्कालं पिशाचवरराजः ।
भ्रान्त्वा[१००] विमलात्मासौ व्रजति हि समतां परेशेन । इति ।

एवं च सबीजदीक्षयां निर्बीजदीक्षयां च न कोऽपि शङ्काशूक इत्यलमतिप्रसङ्गेन ।

एवं दीक्षणीयान्विज्ञानकलप्रलयाकलसकलभेदभिन्नानुक्त्वा एतेषां च शक्तिनिपाततारतम्येन दीक्षाभेदान्मुक्तिरिति वक्तुं दीक्षाबीजप्रथमद्वैविध्येनाह–

निराधारोऽथ साधारः शिवस्यानुग्रहो द्विधा *।। ११ ।।

---

[९८] अननुष्ठाने] C3; अनुष्ठाने च C1

* अयं सार्धैकश्लोकः अघोरशिवाचार्यैः तत्त्वसंग्रहस्य ३८ तमश्लोकव्याख्याने उद्धृतः

[९९] न जन्मान्तरभाविफलावहत्वं] C3; तज्जन्मान्तरभाविफलावहत्वं C1

[१००] भ्रान्त्वा C1, C3; अत्र व्याख्याने भ्रान्त्वा इति पाठः गृहीतः यः साधुः । स एव पाठः P. S. Filliozat महाशयैः सम्पादिततत्त्वसंग्रहेऽपि षणमातृकाधारेण गृहीतः । परन्तु देवकोट्टैप्रकाशने भ्रान्त्या इति पाठः आदृतः ।

शिवस्यानुग्रहः पशोः संस्कारमोचनेच्छा सा[१०१] च दीक्षाबीजं निराधारसाधारभेदेन द्विधा । तत्राचार्यरूपमाधारं विना यः प्रवर्तते स निराधारः । आचार्यरूपमधिष्ठायैव यः प्रवर्तते स तु साधारः । तथा चिन्त्यविश्वे (८: २०)–

साधारा च निराधारा साधारा सकलस्य तु ।
निराधाराह्वयान्येषामेवं[१०२] दीक्षा मयोदिता । इति ।

अमुमेव कारणभेदेन विषयभेदेनाप्याह–

शिवोऽनपेक्षिताचार्यो द्विधा शक्तिनिपातनात् ।
स्वयमेवानुगृह्णाति विज्ञानप्रलयाकलान् ॥ १२ ॥

वष्टृ प्रकाशत इति शिवः । स्वयं प्रकाशरूप इत्यर्थः । वश कान्ताविति धातोर्वर्णव्यत्ययेन सिद्धत्वात् साधुः । तदुक्तमभियुक्तैः–

हिंसिधातोः सिंहशब्दो वश कान्तौ शिवः स्मृत ।
वर्णव्यत्ययतः सिद्धः पश्यकः कश्यपो यथा । इति ।

अनपेक्षिताचार्यः आचार्यमूर्त्यावेशं कृत्वैव विज्ञानप्रलयाकलान् विज्ञानाकलान् प्रलयाकलांश्च द्विधा शक्तिनिपातनात् तीव्रतीव्रतरभेदेन द्विविधशक्तिनिपातनात् । तत्र विज्ञानकलेषु तीव्रशक्तिनिपातः प्रलयाकलेषु तीव्रतरः । अत एव प्रलयाकलानां विज्ञानकलत्वं[१०३] प्राप्यापि मुक्तिः स्वयमेव एतावन्तं कालं मत्कल्पिताधिकारेषु परिश्रान्ता इदानीं मुक्ता भविष्यथेति दययेति भावः । अनुगृह्णाति मलमायापाशविश्लेषाख्यमनुग्रहं

---

[१०१] स C3; सा C1

[१०२] निराधाराह्वयान्येषां C3; निराधारा ह्यथान्येषां इति पाठः अचिन्त्यविश्वसादाख्यस्य Pondicherry नगरस्थ French Institute संस्थायां विद्यमानायां पत्रात्मकहस्तलिखितमातृकायां दृश्यते ।

* निराधारो द्वयोस्तेषां साधारः सकलस्य तु ।
आचार्यनिरपेक्षा या क्रियते शम्भुनैव या ।
तीव्रशक्तिनिपातेन निराधाराथ सा स्मृता ।
इत्ययं सार्धैकश्लोकः T, मातृकायां तथा मुद्रितरौरवामस्य तृतीयभागे (R) च वर्तते । C, M1, T2 मातृकासु परं नास्ति । व्याख्याकारेणापि न व्याख्यातः ।

[१०३] विज्ञानकलत्वं C1; विज्ञानकलत्वपदं C3

करोति । तदुक्तं चिन्त्यविश्वे (८:२१)–
आचार्यनिरपेक्षेण तीव्रशक्त्या तु शम्भुना ।
या क्रियते सा तु निराधारेति कीर्तिता । इति ।
एवं निराधारमनुग्रहमुक्त्वा साधारमाह–

आचार्यमूर्तिमास्थाय चतुर्धा शक्तिपाततः ।
भगवाननुगृह्णाति स एव सकलानपि ॥ १३ ॥

भगवान् अपरिच्छिन्नैश्वर्यादियुक्तः
ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः ।
ज्ञानवैराग्ययोश्चैव षण्णां भग इति श्रुतिः इति वचनात् सकलानपि मलमायाकर्माख्यपाशत्रययुतानपि । चतुर्धा शक्तिपातनात् तीव्रतरतीव्रमन्दमन्दतराख्यचतुर्विधनिजशक्तिपातनात् अनुगृह्णाति अनुग्रहं करोति । तदुक्तं चिन्त्यविश्वे–
गुरुमूर्तिं समास्थाय मन्दतीव्रादिभेदतः ।
भक्त्या शम्भुश्च कुरुते या दीक्षा साधिकारिणी । इति[१०४] ।
श्रीमत्किरणे (४:२९)–
एतच्च कुरुते शम्भुः स्वतन्त्रत्वाद्विभुत्वतः[१०५] ।
सर्वानुग्रहकृच्छान्तः शक्तिपातेन दीक्षया । इति[१०६] ।
ननु शक्तिनिपाततारतम्येन दीक्षेत्युच्यते शक्तेर्विभुत्वेन तन्निपातस्यैवासम्भवात् कुतस्तारतम्यमिति चेदुच्यते । शक्तेरनुग्रहोन्मुखत्वमेव निपात इत्युपचर्यते । तदुक्तं श्रीमत्किरणे (५:३–७)–
उपचारेण शब्दानां प्रवृत्तिरिह दृश्यते ।

---

